# Shri Mahalakshmi Stotram

# श्रीमहालक्ष्मीस्तोत्रम्

## Document Information

Text title : Shri Mahalakshmi Stotram

File name : mahAlakShmIstotram.itx

Category : devii, devI, lakShmI, shrIdharasvAmI

Location : doc_devii

Author : Shridharaswami

Transliterated by : Prakash Ketkar

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: https://shridharamrut.com

Latest update : November 3, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

Shri Mahalakshmi Stotram

# श्रीमहालक्ष्मीस्तोत्रम्

सर्वसौभाग्यरूपा त्वं सर्वसम्पत्स्वरूपिणी ।
सर्वकल्याणरूपा त्वं महालक्ष्मि नमोऽस्तु ते ॥ १॥

जनश्रीस्त्वं वनश्रीस्त्वं मङ्गलश्रीः स्वभावतः ।
ब्रह्मश्रीश्च मोक्षश्रीश्च महालक्ष्मि नमोऽस्तु ते ॥ २॥

शान्तिस्तुष्टिस्तथापुष्टिर्मेधा कीर्तिश्च सन्मतिः ।
दैवीसम्पत्स्वरूपा त्वं महालक्ष्मि नमोऽस्तु ते ॥ ३॥

मोक्षसाधनसम्पत्तिरायुरारोग्यसंसृतिः ।
सर्वैश्वर्यस्वरूपा त्वं महालक्ष्मि नमोऽस्तु ते ॥ ४॥

भक्तियोगा ब्रह्मनिष्ठात्वमेवैकाखिलेश्वरी ।
तदैव ब्रह्मरूपा च महालक्ष्मि नमोऽस्तु ते ॥ ५॥

सच्चिदानन्दरूपा त्वं जगन्माता जगत्पिता ।
विष्णुब्रह्ममहेशास्त्वं महालक्ष्मि नमोऽस्तु ते ॥ ६॥

यतो हि जायते विश्वं यतश्च परिपाल्यते ।
यस्मिन् संलीयते ह्यन्ते महालक्ष्मि नमोऽस्तु ते ॥ ७॥

यच्च किञ्चित् सुष्ठुजातं यच्च किञ्चित् शुभं सुखम् ।
तदेवैकात्मरूपेण महालक्ष्मि नमोऽस्तु ते ॥ ८॥

वेदस्मृतिः सदाचार आत्मतुष्टिर्गुरोः कृपा ।
सर्वोपास्यस्वरूपा त्वं महालक्ष्मि नमोऽस्तु ते ॥ ९॥

वशमेवाद्वयं ब्रह्म नित्यानन्दैकमात्रतः ।
भेदबुद्धिमपास्यैवं महालक्ष्मि नमोऽस्तु ते ॥ १०॥

इति श्री श्रीधरस्वामीविरचितं महालक्ष्मीस्तोत्रं सम्पूर्णम् ॥

शरन्नवरात्रि, रचनास्थानम् श्रीक्षेत्र वरदपुर, संवत्सर १९७२

श्री श्रीगळवर कोनेय एकान्तदल्लि

*Shri Mahalakshmi Stotram*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*